# विविधप्रश्नावलिः - ३

१. प्रश्नानाम् उत्तराणि एकपदेन लिखत–

(क) कस्मिन् मासे स्वतन्त्रतादिवसः भवति?

(ख) भोजस्य नाम केन कारणेन प्रसिद्धम्?

(ग) वयं कस्य सेवार्थं निरन्तरं चलिष्यामः?

(घ) धनिकः किम् अयच्छत्?

(ङ) सिक्खधर्मस्य प्रवर्तकः कः?

(च) कार्याणि केन सिध्यन्ति?

(छ) व्यापारिणां नूतनसंवत्सरः कदा आरभते?

२. प्रश्नानाम् उत्तराणि एकवाक्येन लिखत–

(क) प्रथमस्वतन्त्रतासङ्ग्रामः कदा अभवत्?

(ख) दीपावल्यां लक्ष्मीः कदा पूज्यते?

(ग) विप्रम् अतिदरिद्रं ज्ञात्वा राजा किम् अपृच्छत्?

(घ) गुरुनानकदेवः कस्मिन् प्रान्ते अभवत्?

(ङ) गुरुनानकः कस्य भोजनं स्वीकृतवान्?

(च) वस्तूनि केन शीतलानि भवन्ति?

(छ) कस्य यन्त्रस्य गतिः वायुयानात् द्रुततरा भवति?

३. उचितशब्दैः रिक्तस्थानानि पूरयत–

(क) अधुना वयं .................. गच्छामः। (गृहाय/गृहं)

(ख) आपणाः ग्राहकैः .............. सन्ति। (परिपूर्णः/परिपूर्णाः)

(ग) ................. कार्याणि सिध्यन्ति। (उद्यमेन/उद्यमाय)

(घ) श्रमेण .............. उन्नतिः भवति। (राष्ट्राय/राष्ट्रस्य)

(ङ) नाटकदर्शनं ................... भवति। (दूरदर्शनेन/दूरदर्शनात्)

(च) नानकः धनिकस्य भोजनं ............... शुष्करोटिकाः स्वीकृतवान्। (त्यक्त्वा/त्यक्तुम्)

(छ) शिक्षाक्षेत्रे ....... महती भूमिका अस्ति। (सङ्गणकयन्त्रस्य/सङ्गणकयन्त्राय)

(ज) मम ................ आनीतं भोजनम्। (गृहेण/गृहात्)

४. निर्देशानुसारं परिवर्तनं कुरुत–

| | | | |
|---|---|---|---|
| (क) | स्थास्यन्ति | .................... | (लट्लकारे) |
| (ख) | गायन्ति | .................... | (लृट्लकारे) |
| (ग) | शिक्षितः | .................... | (बहुवचने) |
| (घ) | प्रदेशस्य | .................... | (बहुवचने) |
| (ङ) | भवति | .................... | (बहुवचने) |

५. अर्थानुसारं युग्मानि योजयत–

| | (अ) | (ब) |
|---|---|---|
| (क) | भारतीयाः स्वतन्त्रतायै | त्रयोदश्यां भवति। |
| (ख) | धन्वन्तरिपूजनं | कार्याणि न मनोरथैः। |
| (ग) | उद्यमेन हि सिध्यन्ति | निरन्तरं प्रयासं अकुर्वन्। |
| (घ) | वयमेव करिष्यामः | चलिष्यामो निरन्तरम्। |
| (ङ) | सर्वभूतहितार्थाय | भारतस्यापि मङ्गलम्। |
| (च) | येषां न विद्या न तपो न दानं | कालो गच्छति धीमताम्। |
| (छ) | काव्यशास्त्रविनोदेन | ज्ञानं न शीलं न गुणो न धर्मः। |
| (ज) | दूरदर्शनम् | यात्रां करोमि। |
| (झ) | वायुयानेन | श्रवणमेव सम्भवम्। |
| (ञ) | आकाशवाणीयन्त्रेण | दृश्यश्रव्यं यन्त्रम्। |

६. अन्वयपूर्तिं कुरुत–

(क) काकः ........... ........... कृष्णः, कः भेदः ..........., ........... काले सम्प्राप्ते ........... काकः ........... पिकः।

(ख) वयम् ........... विना सततं ........... करिष्यामः, ........... ........... चलिष्यामः, निरन्तरं ...........।